# कालिदासवर्णितवियोगे मानवेतराणां सहानुभूतिः

कृष्णगोपालपात्रः

वाग्देवतावतारस्य महाकविकालिदासस्य रचनासु दृश्यते विविधदिग्गामिनी प्रतिभा। तद्रचनासु प्रकृतिचित्रणं तु सर्वासु दिक्षु परिलक्ष्यते। दीपशिखाकाव्येषु हि प्रकृतिः कदाचित् स्वस्वरूपेण क्वचिद् विभावादिरूपेण क्वचित् प्रतीकरूपेण कदाचिच्च चेतनसत्तारूपेण चित्रिता।

सम्भोगशृङ्गारापेक्षया विप्रलम्भशृङ्गारस्य परा काष्ठा लक्ष्यते तत्र तत्र कालिदासीयकाव्येषु। तथाहि

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलायाम्
आत्मानं ते चरणपतितं यावदिच्छामि कर्तुम्।
अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः॥ (मेघदूते उत्तरमेघे ४२)

शङ्करस्य तृतीयनेत्रस्थेनाग्निना भस्मीभूतस्य कामदेवस्य शरीरं दृष्ट्वा दृश्यते रतेः विलापः।

शशिना सह याति कौमुदी सह मेघेन तडित्प्रलीयते।
प्रमदाः पतिवर्त्मगा इति प्रतिपन्नं हि विचेतनैरपि॥ (कुमारसम्भवे ४/३३)

कालिदासवर्णितविप्रलम्भे जडा प्रकृतिरपि इत्थं संवेदनशीला प्रदर्शिता यत् सापि मनुष्यवत् सुखदुःखयुक्ता इति भाति। अर्थात् सेयम् अचेतना प्रकृतिरपि मनुष्यवत् स्वव्यापारं प्रदर्शयति। यथा मेघस्य संयोगेन रामगिरिः स्नेहव्यक्तिः भवति।

मेघो हि अचेतनः तथापि स मनुष्यवत् यक्षस्य विरहम् अवगम्य यक्षप्रेरितसन्देशान् यक्षप्रियां प्रति प्रापयेदिति मत्वा मेघं प्रत्याह यक्षः–

सन्तप्तानां त्वमसि शरणं तत् पयोद प्रियायाः
सन्देशं मे हर धनपतिक्रोधविश्लेषितस्य।
गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां
बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या॥ (मेघदूते पूर्वमेघे ७)इति।

अचेतनस्य मेघस्यापि प्रियाविरहेण विरहितं यक्षं प्रति सहानुभूतिः स्यादेव इति विचिन्त्य मेघं स्वसन्देशान् यक्षप्रियां प्रापयितुम् अनुरुन्धे यक्षः।

सन्देशप्रेरकः वार्तावाहकः दूतो वा सामान्यतया मनुष्यो भवति तदितरः प्राणी वा। परन्तु इह मेघदूते कालिदासेन प्रदर्शितं यद् मनुष्येतरः अचेतनः मेघः अपि वार्ताप्रेरणे समर्थः।

यक्षस्तु प्रियाविरहाद् एवं विवेकरहितः सञ्जातः यत् कल्पनादृष्टां प्रियाम् आलिङ्गितुम् आकाशे हस्तौ प्रसारयति परन्तु क्षणेनैव हस्तौ प्रियारहितौ इति ज्ञात्वा भृशं दुःखितो भवति। यक्षस्य इमाम् अवस्थां वीक्ष्य वनस्थलीदेवता अपि मुक्तास्थूलानश्रुबिन्दून् पातयन्ति–

ममाकाशप्रणिहितभुजं निर्दयाश्लेषहेतो-
र्लब्धायास्ते कथमपि मया स्वप्नसन्दर्शनेषु।
पश्यन्तीनां न खलु बहुशो न स्थलीदेवतानां
मुक्तास्थूलास्तरुकिसलयेष्वश्रुलेशाः पतन्ति॥ (मेघदूते उत्तरमेघे ४३)

प्रियाविरहेण पीडितस्य यक्षस्य कातरस्वरं मर्मीकृत्य लोकोपकारतत्परः मेघश्रेष्ठः यक्षोक्तायाः यक्षप्रियायाः प्राणान् पातुं लोकोत्तरवाण्या पूर्वोक्तं यक्षसंदेशं यक्षप्रियां जगाद।

एवं प्रत्यक्षतया दृश्यते मेघदूते वियोगस्य बलवती वेदना।

मदने भस्मीभूते सति मदनसुहृत् चन्द्रः आत्मनः उदयमेव निष्फलं मन्यते। नवचूतकुसुमानां मदनकृतवाणत्वं न सिध्यति। कोकिला अपि मधुरस्वरं त्यक्तवन्तः। किञ्चालिपङ्क्तिः या मदनेन गुणकृत्ये नियोजिता सा अधुना कारुणिकस्वरैः रतिमेवानुकरोति–

अलिपङ्क्तिरनेकशस्त्वया गुणकृत्ये धनुषो नियोजिता।
विरुतैः करुणस्वनैरियं गुरुशोकामनुरोदितीव माम्॥ (कुमारसम्भवे ४/१५)

इत्येवं प्रकारेण कालिदासेन रतिविलापप्रसङ्गे पशुपक्षिणामवस्था रतिमुखेन वर्णिता।

इन्दुमतीशोकविह्वलः महाराजः अजः अपि इन्दुमतीप्रयाणे शोकातुराणां वृक्षादीनां वास्तविकस्वरूपं निर्वर्णयति। तथाहि यः अशोकवृक्ष इन्दुमत्या पद्भ्यां स्पृष्टः अधुना पुष्परूपाश्रूणि विमोचयति–

अमुना कुसुमाश्रुवर्षिणा त्वमशोकेन सुगात्रि शोच्यसे॥ (रघुवंशे ८/६३)

विलपन्तम् अजं दृष्ट्वा वृक्षादयोऽपि रसरूपाश्रूणि विमोचयन्ति-

विलपन्निति कोसलाधिपः करुणार्थग्रथितं प्रियां प्रति।


*dipaśikhā*/v1/2016/krishnagopal patra/pp.7-8

अकरोत् पृथिवीरुहानपि स्रुतशाखारसबाष्पदूषितान्॥ (रघुवंशे ८/७०)

एवं हि दृश्यते शोकविह्वलस्य अजस्य करुणविलापेन अरण्यप्रदेशोऽपि शोकस्तब्धः सञ्जातः।

ज्येष्ठादेशाद् अत्याज्यामपि सीतां यदा लक्ष्मणः परित्यजति तदा पुरस्तात् स्थिता जह्नोर्दुहिता तरङ्गरूपहस्तमुत्थाप्य सीतापरित्यागं वारयति।

अवार्यतेवोत्थितवीचिहस्तैर्जह्नोर्दुहित्रा स्थितया पुरस्तात्॥ (रघुवंशे १४/५१)

सीतापरित्यागात् समदुःखिनो मयूराः नृत्यं त्यक्तवन्तः, वृक्षाः कुसुमानि परित्यक्तवन्तः, मृगास्तु भक्षणयोग्यान्यपि तृणानि मुखाद् अपसारयामासुः।

नृत्यं मयूराः कुसुमानि वृक्षा दर्भानुपात्तान्विजहुर्हरिण्यः।
तस्याः प्रपन्ने समदुःखभावमत्यन्तमासीद् रुदितं वनेऽपि॥ (रघुवंशे १४/६९)

अभिज्ञानशाकुन्तलेऽपि दृश्यते प्रकृत्या सह शकुन्तलायाः तादात्म्यानुभूतिः। वनस्पतिसेवां सा 'आज्ञा गुरूणां ह्यविचारणीया' इति दृष्ट्या न करोति। अपि तु भ्रातृस्नेहेनैव करोति। स्पष्टीकरोति सा एव 'न केवलं तातनियोगः, अस्ति मे सहोदरस्नेहः' इति । वनस्पतिमृगादिषु यथा तस्याः स्नेहः तेषामपि शकुन्तलां प्रति सहानुभूतिरासीत्। वनस्पतयः शकुन्तलापतिगृहगमनवेलायां तस्यै वस्त्राभूषणं प्रददति। पक्षिणः लताश्च तस्या अभिनन्दनम् अकुर्वन्। शकुन्तलाविरहे शोकमग्ना हि आश्रमवृक्षाः प्राणिनश्च। तथापि सा आश्रमतरुभिः वनवासबन्धुभिः अनुमतेति तातः कण्वः शकुन्तलाम् अकथयत्-

अनुमतगमना शकुन्तला तरुभिरियं वनवासबन्धुभिः।
परभृतविरुतं कलं यतः प्रतिवचनीकृतमेभिरात्मनः॥ (शाकुन्तले ४/१३)

शकुन्तला पतिगृहगमनकाले आश्रमविरहकातरा भवति तस्मिन् काले प्रियंवदा तां ब्रूते सखि न केवलं त्वमेव दुःखिता अपि तु त्वद्वियोगेन आश्रमस्थाः प्राणिनो अपि कातराः इति। तथाहि

उद्गीर्णदर्भकवला मृगी परित्यक्तनर्तना मयूरी।
अपसृतपाण्डुपत्राणि मुञ्चन्त्यश्रु इव लताः॥ (शाकुन्तले ४/१४)

शकुन्तलाविरहेण शकुन्तलामनुसरन् मृगशावकः पतिगृहं प्रतिष्ठमानायाः शकुन्तलायाः मार्गं न जहाति-

यस्य त्वया व्रणविरोपणमिङ्गुदीनां
तैलं न्यषिच्यत मुखे कुशसूचिविद्धे।
श्यामाकमुष्टिपरिवर्धितको जहाति
सोऽयं न पुत्रकृतकः पदवीं मृगस्ते॥ (शाकुन्तले ४/१६)

एवं वियोगवर्णने हि दृश्यते कालिदासीयकाव्ये विशिष्टता। तत्काव्यनाटकादिषु विद्यमानानि पात्राणि तु वियोगं प्रकटयन्त्येव तदितरे अचेतनप्रकृतिप्राणिवृक्षलतादयोऽपि स्वानुभवं स्फुरयन्ति। नायकवियोगाद् नायिकायाः नायिकावियागाद्वा नायकस्य चेतः दुःखपीडितं भवतीति तु सामान्यमेव। परन्तु नायकनायिकावियोगात् सुहृद्वियोगाद्वा मनुष्येभ्य इतरेषामपि मनः दुःखितं भवतीति काचित् अभिनववर्णनरीतिः दृश्यते ततो ज्ञायते तस्मिन्नपि कोणे लब्धप्रवेशः कालिदासः।



(चित्रं तथागतमण्डलेन स्वीकृतम्)